# मूर्खः विजानत् |

## त कारान्त शब्दाः |

पुरा एकस्मिन् नगरप्रान्ते, देवशर्मा नाम कश्चित् विजानत् (knowledgeable person) न्यवसत् | सः जगत्प्रसिद्धः यशस्वी च विद्वान् आसीत् | तस्य दर्शनार्थम् अनेके जनाः आगत्य तस्मात् विद्यां प्राप्य कृतार्थाः अभवन् | ते तस्मात् आशीर्वादप्राप्त्यर्थम् अनेकानि उपायनानि, भोजनं, धनं, वस्त्राणि च समर्पितवन्तः | येषाम् उपायनानां तस्य कृते आवश्यकता नासीत् तेषां विक्रयणं कुर्वन् आसीत् सः | एवम् उपायनानां विक्रीकरणात् तेन बहुलं संपद् संपादितम् |

विजानत् अतीव ज्ञानवान् | तस्य ज्ञानं मात्र ग्रन्थोपेतम् | मनुष्यस्वभावस्य तु परीक्षा विशेषरूपेण कर्तुं सः असमर्थः आसीत् | सः स्वभावेन अपि सर्वविश्रम्भी नासीत् | अतः सर्वं संपदम् एकस्मिन् स्यूते स्थापयित्वा एतत् स्यूतः सदैव कक्षीकृतः (kept under the arm ) तेन | सः कदापि तं स्यूतं स्वस्मात् पृथक् न करोति स्म |

एकदा कश्चन संश्चत् (धूर्तः rogue ) विजानतः आवासम् आगच्छत् | विजानतः स्वभावं तथा तस्य समीपं स्थितं स्यूतं च अभिवीक्ष्य संश्चता निर्णीतं " विजानतः स्यूते अवश्यमेव बहुलः कोशः स्यात् यत् क्षणमपि स्वस्मात् न दूरीकरोति अयम् " इति |

सः संश्चत् तं स्यूतं चोरयितुं कल्पितवान् परन्तु केन उपायेन इति न ज्ञातवान् | सः अचिन्तयत्, "मया अस्य देवशर्मणः आवासस्य भित्तिकायां छेदं कर्तुं द्वारतां लङ्घयितुं वा न शक्यते | किं करणीयम् | अन्यः

उपायः अस्ति यत् मधुरवाचा लालित्येन च विजानतः चित्ताकर्षणं करिष्यामि | तर्हि सः मां शिष्यरूपेण स्वीकरिष्यति | यदा अवसरः प्राप्नोमि, तदा तस्य धनं चोरयित्वा मया इतः पलायनम् एव करणीयम् | साधु | अयमेव मार्गः | परिश्रमेण एतस्य विजानतः  आपत्कृत् ( trustworthy ) शिष्यः भविष्यामि " इति सुनिश्चितीकृत्य सः संश्चत् देवशर्मणः निवासम्  उपागतः |

अचिरादेव सः विजानतः सकाशम् अगच्छत् | तं विनम्रभावेन प्रणम्य तस्य पादयोः पतित्वा अवदत्, "ॐ नमः शिवाय | गुरुवर्य ! विधुरीभूतं (dejected) मे मनः| मनःप्रसादं कथं प्राप्नुयाम् इति कृपया मार्गदर्शनं करोतु मे भवान् " इति |

प्रीतिपूर्वकं (kindly) सः विजानत् तं संश्चतम् अवदत्, "हे वत्स! सुकृत् असि (blessed you are) यत् तारुण्ये एव मनःशान्त्यर्थम् अत्र आगतोऽसि | अन्याः सर्वे अर्थार्जनार्थमेव कामपि विद्यां पठितुम् अत्र आगच्छन्ति " इति |

प्राप्तावसरः संश्चत् झटिति पुनः विजानतः पादयोः पतित्वा अवदत्, कृपया मां शिष्यरूपेण स्वीकरोतु | अहं भवतः आज्ञापालनं सदैव करिष्यामि" इति|

विजानत् तं धूर्तम् अवदत् " अहं त्वां शिष्यरूपेण स्वीकरोमि परन्तु एकः समयः प्रतिबन्धः वा अस्ति| मत्सदृशैः विज्ञातृभिः  रात्रिः एकत्वे यापनीया |  रात्रौ अहं ध्यान-धारणां करोमि तेन अहं सरलतया

अध्यात्मचेताः भवितुं शक्नोमि | अतः रात्रौ त्वया मन्दिरं न प्रवेशनीयम् | त्वया  मन्दिरस्य द्वारे, कुटीरे एव  निद्रा कर्तव्या” इति |

संश्चत् शिष्यः समयम् अङ्गीकृतवान् | विजानत्  अपि तं संश्चतं यथाविधिः शिष्यरूपेण स्वीकृतवान् | सः धूर्तः अनुशासनपरः शिष्यः अभवत् | विजानतं  सेवित्वा निवासमन्दिरस्य स्वच्छताम् अपि नित्यं करोति स्म | अति चाटु वचनैः तेन विजानतः मनः आकृष्टम् | अहोभाग्यं यत् एतादृशः शिष्यः अत्र आगतः मया प्राप्तश्च इति विजानत् चिन्तयति स्म | विजानत् शिष्यस्य सेवया अति प्रसन्नः अभवत् |

कतिपयानि दिनानि व्यतीतानि, परन्तु संश्चत् विजानतः स्यूतं चोरयितुम् असमर्थः आसीत् | सः अतीव विडम्बितः ( frustrated) अभवत् | “अयं मयि विश्वासः अधुना अपि न करोति |कथं तं स्यूतं लभेय? इमं विजानतं छुरिकया अथवा विषेण हत्वा एव तं स्यूतं  लब्धुं शक्यते वा ? “ एवंविधान्  दुष्टान्  विचारान् सः चिन्तयामास |

इत्थं विचिन्तयति संश्चति, एकः सुवर्णावसरः प्राप्तः| विजानता तस्य अन्यशिष्यपुत्रस्य उपनयनार्थम्  आमन्त्रणं स्वीकृतम् | उपनयनम् अन्यस्मिन् नगरे आसीत्| उपनयनार्थं गन्तुमिच्छन् विजानत् वस्त्रेण आच्छादितं स्वधनस्यूतं कक्षीकृत्य ( holding under the arm) संश्चता शिष्येण सह नगरान्तरं प्रस्थितः | वनमार्गेण गन्तव्यम् आसीत् | किञ्चित् दूरं गतेन विजानता एकः रुधिररूषितः (covered with blood) मृगशावकः दृष्टः | सः मृगः केनापि व्याधेन बाणाहतः आसीत् |

करुणया आविष्टः सः विजानत् तं मृगशावकं प्रति गतवान् तं मृगशावकं जलं पाययितुम् ऐच्छत् च | इतस्ततः पश्यतः तस्य मुनेः दृष्टिगोचरम् एकः शर्यणावत् (reedy pond ) आगतः| स्वधनस्यूतं तत्रैव शिलायां स्थापयित्वा तस्योपरि वस्त्रमाच्छाद्य, शिष्यम् “अत्रैव तिष्ठतु | अहम् अचिरात् आगच्छामि” इति उक्त्वा मृगशावकं हस्ताभ्याम् उद्वहन् सः शर्यणावतं प्रति गतवान् |

विजानतः पूर्णम् अवधानं मृगशावकस्योपरि एव आसीत् | एकाग्रचित्तेन तेन मृगशावकस्य व्रणः परिमार्जितः शावकं जलमपि अप्राशयत् सः|

संश्चत् अस्येव सुवर्णावसरस्य प्रतीक्षायाम् आसीत् | लब्धावसरः सः संश्चत् तं धनस्यूतं गृहीत्वा ततः पलायितः| यदा मुनिः सरोवरात् पुनरागतः तदा तेन दृष्टं यत् शिष्यः लुप्तः धनस्यूतः अपि लुप्तः| स्यूतस्य स्थाने स्यूतोपरि आच्छादितं वस्त्रं तथा तस्योपरि एकः शिलाखण्डः स्थापितः आसीत् | क्षणमेकं विजानतः नेत्रयोः पुरतः अन्धःकारः एव आच्छादितः | क्षणान्तरं धूर्तशिष्यस्य वञ्चनां व्यजानत् अजानत् |

सरोषं सः आक्रोशत् “ हे दुष्ट ! कुत्रासि त्वम् ? मां मुषित्वा कुत्र गतोऽसि” ? किन्तु इदम् अरण्यरुदनमिव निष्फलीभूतम् |

सः विजानत् धूर्तस्य पदानुसरणं कृत्वा गन्तव्यं नगरं प्राप्तवान् | परन्तु तत्र बहुलम् अन्विष्यापि सः तं धूर्तं ग्रहीतुं तथा स्वधनं प्रापयितुम् असफलः अभवत् |

अतिखिन्नः सः रात्रिं तस्मिन्नगरे यापयित्वा अन्येद्युः रिक्तहस्तः स्वमन्दिरं प्रतिनिवृत्तः |

अतः बुधैः उच्यते “ धूर्तस्य मधुरवाचि विश्वासः न करणीयः “

Sheela Kalawer